पुनः पुनः पलायनं केवलं पलायनं नास्ति प्रत्युत विकल्पनिर्माणप्रक्रियायाः काचित् शृङ्खला वर्तते। अनेन सहैव ताडनपीडायाः सातत्येन अनुभवाय आवश्यक उपायोऽपि वर्तते। अस्याः पीडायाः अनुभवः अत्यन्तम् आवश्यकः। एतेन अनुभवेन विना, न मुक्तेः स्वप्नः स्मृतिपथे स्थास्यति, न च जीवनस्य परिवर्तनाय यत्नस्य अभीप्सा जीविष्यति। एताम् अभीप्सां विना सा ग्रीवाभङ्गपर्यन्तं निष्फलं यत्नमपि न कर्तुं शक्ष्यति।

पितृसत्ता एकतः स्त्रीं गृहान्तर्गतम् एव बद्धवती अपि च तस्याः गृहकर्मणः अवमूल्यनं कृतवती। अपरतः विभिन्नमूल्यैः, मान्यताभिः, संस्कारेश्च शोषणं सहजस्वाभाविकसत्यरूपेण चित्ते स्थापयितुं प्रयत्नं कृतवती। काव्ये दर्शिता स्त्री आर्थिकदृष्ट्या स्वावलम्बिनी नास्ति इत्येतत् एवं च विभिन्नसंस्काराणाम् ऊर्णनाभजालबन्धनं तस्याः निजनिवासं निर्मातुं बाधकं भवति। एतानि वैचारिकबन्धनानि तावद्दृढानि सन्ति यत् यावत्पर्यन्तं रज्जुः गच्छति, मन्दिरसोपानानि, पितृगृहम्, सम्बन्धिनां गृहं वा, तावत्पर्यन्तं सा पलायते। पुनः श्वशुरालये तस्याः दुःखजन्यानियतिः। परन्तु, प्रतिरात्रं सा यं मुक्तिस्वप्नं पश्यति तद्द्वारेण मार्गम् अवश्यं रचयिष्यति, मोक्षं नूनं प्राप्स्यति। जीवनं नूनं परिवर्तिष्यते। यतो हि एषा कविता कस्याश्चित् सामान्यस्त्रियाः यथार्थं दृष्टिपथं नयति एवं च सा स्त्री मुक्तिकामनया सह प्राणपणेन ग्रीवाभङ्गं यावत् कल्पितम् आदर्शं रचयितुं यत्नं करोति इत्यतः अस्याः कवितायाः विषये किञ्चिद्विस्तरेण विचारः अवश्यं करणीयः।

'स्वप्न' इति कवितायाः माध्यमेन स्त्रीमुक्तेः यथार्थस्य एवं च कल्पितस्य आदर्शस्य विषये अवश्यं विचारणीयं यतो हि इयं कविता यस्याः स्त्रियाः जीवने जायमानं पारिवारिकम् अत्याचारम् विषयीकरोति, सा स्त्री 'स्त्रीवादस्य' सिद्धान्तं पठित्वा स्वमुक्तिं न कामयते। वस्तुतस्तु जीवनजगतः यथार्थतः तस्याम् इयं मुक्तिभावना उत्पन्ना। अत्र एतत् स्पष्टीकरणम् आवश्यकं यत् यदि काचिद् स्त्री स्त्रीवादसम्बद्धान् सिद्धान्तान् पठित्वा श्रुत्वा अथ वा ज्ञात्वा मुक्तेः कामनां कुरुते अथ वा तदर्थम् अग्रेसरति तर्हि एतत् अपूर्वं कार्यं, न तु दोषः। अत्रैव मुक्तिकारिणीनाम् अवधारणानां सफलता विद्यते। एतद् वक्तव्यं तेषां कृते वर्तते ये स्त्रीवादम् एवं च तत्सम्बद्धाः धारणाः दुष्प्रचारयितुं मिथ्या प्रलापं कुर्वन्ति, ये मन्यन्ते यत् सामान्यस्त्रीणां अनेन सह कोऽपि सम्बन्धः नास्ति। अस्य काव्यस्य पठनेन सुस्पष्टं यत् एषा स्त्री पितृसत्तात्मकतन्त्रेण प्रभाविता अस्ति। एषः प्रभावः स्वाभाविकः यतः तत्रैव एषा जाता तत्रैव च वर्धिता। अवधेयमिदं यत् अस्मिन् तन्त्रे तिष्ठन्ती अपि स्वप्नं पश्यति स्वप्नाय यत्नं चापि करोति। एष स्वप्नः यत्नश्च च तस्यै मोक्षप्रदौ सेत्स्यतः।

निस्सन्देहम्, विश्वस्य सर्वेषु समुदायेषु सभ्यतासु धर्मेषु राष्ट्रेषु च पितृसत्तायाः अस्तित्वं विद्यते। परिणामतः स्त्रियः पुरुषेभ्यः हीनाः मन्यन्ते। अपवादस्वरूपं कानिचन राष्ट्राणि अस्मात् मुक्तानि स्युः तथापि तत्र रूपभेदेन पितृसत्ता तिष्ठति। पृथक् गुणैः धर्मैः सह अस्याः अस्तित्वं विद्यते। कालानुसारं विविधशक्तिभिः सह कुप्रवृत्तिसङ्गं कृत्वा अस्याः स्वरूपम् अपि परिवर्तितम् अतः पृथक् पृथक् देशे काले च अस्याः एकं सार्वत्रिकं रूपं न दृश्यते।

केचन जनाः मन्यन्ते यत् पितृसत्तात्मकं तन्त्रं सामन्तवादिसंरचनायाः उत्पादः अस्ति। अस्यां सामाजिकसंरचनायामेव तस्य अस्तित्वं विद्यते। एवं मन्यमानानां विश्वासो वर्तते यत् धनाधिपत्यवादेन सह एतत् स्वयं समाप्तं भविष्यति। एवं मन्यमानेषु ते अपि सम्मिलिताः सन्ति ये पितृसत्तां विदीर्यमाणां पश्यन्तः शोकं यान्ति अपरे च तेऽपि ये पितृसत्तायाः शोषणात्मकम् अमानुषं च रूपं दृष्ट्वा तां परिवर्तयितुं संकल्पं कुर्वन्ति। ये

पितृसत्तायाः कृते शोकम् अनुभवन्ति ते पितृसत्तायाः दृढीकरणं कामयमानाः अतीतानि दिनानि स्मरन्ति एवं च धनाधिपत्यवादं किञ्च तेन सहागतं परिवर्तनमपि दोषयन्ति। अपरतः पितृसत्तायाः चतुराः समर्थकाः नित्यं जायमानेन परिवर्तनेन सह येन केनापि प्रकारेण स्वार्थसन्धिं संयोज्य तस्याः अस्तित्वस्य रक्षणाय यत्नं कुर्वन्ति। पितृसत्तायाः अस्तित्वेन आहताः उपर्युक्तकोटिकाः जनाः धनाधिपत्यवादिषु अधिकाम् अपेक्षां कुर्वन्तः प्रतीयन्ते। किन्तु एतत् निश्चितमस्ति यत् पितृसत्ता केवलं सामन्तीयसंरचनायां न विद्यते। यदि एवम् स्यात् तर्हि विकसितधनाधि-पत्यवादिदेशेषु एषा पूर्णतया लुप्ता अभविष्यत्। किन्तु तथ्यं दर्शयति यत् एतादृश्यां संरचनायामपि पितृसत्ता विद्यमाना अस्ति, यद्यपि परिवर्तितेन रूपेण सह। नहि एष अर्थः यत् सामन्तवादः धनाधिपत्यवादश्च स्त्रीसम्बन्धिप्रसङ्गेषु पितृसत्तायाः अस्तित्वम् आदाय समानौ स्तः। निश्चितं धनाधिपत्यवादस्य भूमिका अस्मिन् सन्दर्भे अधिकं प्रगतिशीला अस्ति। एतेन पितृसत्तायाः परिवर्तनं कृतं किञ्च स्त्रीभ्यः स्वातन्त्र्यम् अपि प्रदत्तम्। परन्तु पितृसत्तायां स्वार्थं दृष्ट्वा धनाधिपत्यवादेन एतेन सह सन्धिः कृतः। पितृसत्तायाः साहचर्येण स्त्रीणां श्रमः अवमूल्यितः। अनेन धनाधिपत्यवादस्य लाभः भवति। एवमेव स्त्री–देहसम्बन्धी विषयः वर्तते। धनाधिपत्यवादेन तस्य बहुभिः उत्पादेश्च स्त्री–देहं किञ्चित् मुक्तीकर्तुं भूमिका व्यूढा। किन्तु, अन्यस्मिन् पक्षे, स्वार्थपूर्तये पितृसत्तया सह परस्परं मेलनं कृत्वा स्त्री–देहं वस्तुवत् परिवर्तयितुं यत्नोऽपि कृतः।

स्त्री–देहस्य मुक्तिः आवश्यकी। स्त्रीणां स्वदेहे पूर्णः अधिकारः भवेत्। परन्तु एतां देहमुक्तिम् उद्घोष्य स्त्री–देहं स्वस्मै सर्वेभ्यश्च सुलभायितुं युक्तिः अपि कृता। अन्यैः शब्दैः स्त्री–देहस्य स्वातन्त्र्यं पितृसत्तात्मकबन्धनेभ्यः मूल्येभ्यः मान्यताभ्यश्च भवेत्। धनाधिपत्यवादस्य माध्यमेन स्त्रीभ्यः निजदेहे स्वीयः अधिकारः प्राप्तः। स्त्रीषु इयं चेतनापि विकसिता यत् तासां देहेषु तासाम् एव अधिकारः। किन्तु 'मुक्तदेहं' पुरुषभोगाय उपलब्धदेहं निर्मातुं यः यत्नः, स अन्ततः पितृसत्तायाः चोरमार्गेण पुनः स्थापयितुमेव प्रयासो वर्तते। इह अन्यः विचारणीयः विषयः अतोऽपि वर्तते। धनाधिपत्यवादस्य विविधोपकरणैः संचारमाध्यमैश्च स्त्रीदेहं भृशं प्रचार्य्य लाभः प्राप्तः। स्त्रीणां गृहस्य सीमातः बहिर्निर्गमनं सार्वजनिकस्थलेषु गमनं स्त्रीमुक्तेः दिशायां कश्चन महत्त्वपूर्णः पादनिक्षेपः। किन्तु विचारणीयमिदमपि यत् अस्मिन् बहिर्निर्गमने किं केवलं स्त्रीमुक्तेः कल्पितादर्शः यथार्थीक्रियमाणः अस्ति? अथवा, पितृसत्तात्मकसंरचना स्वरूपं परिवर्त्य स्त्रीदेहस्य वस्तुकरणं करोति? सम्भवतया तु अस्मिन् पक्षे स्त्रीस्वेच्छा अपि दृश्येत। किन्तु विचार्यतां यत् कया शक्त्या सा 'स्वेच्छा' परिचाल्यते, नियन्त्र्यते? अतः पितृसत्तायाः सीमानाम् अतिक्रम्य अपि स्त्री–देहः कस्य नियन्त्रणेऽस्ति? का शक्तिः अस्यां दिशायां स्त्रीं धावयति? एतं पक्षम् उपेक्ष्य न हि स्त्री–मुक्तेः यथार्थं बोद्धुं शक्यते, न च कल्पितादर्शसर्जनं कर्तुं शक्यम्। वस्तुतः, एताः सर्वाः परिस्थितयः तावत्यः जटिलास्सन्ति यत् अस्याः एकं पक्षं दृष्ट्वा इयं न तु सम्पूर्णतया स्वीकर्तुं योग्या, न च सम्पूर्णतया त्याज्या। अतः धनाधिपत्यवादाय अथवा तस्य विभिन्नोपकरणेभ्यः तदीयप्रगतिशीलतायाः यथोचितं सम्मानः दातव्यः। सममेव तस्य लाभहेतुकात् शोषणमूलकतन्त्रात् तथा च पितृसत्तातः सम्बन्धः विश्लेषनीयः प्रतिषेध्यश्च।

एते द्वे व्यवस्थे व्यतिरिच्य समाजवादिनां साम्यवादिनां वा देशेषु पितृसत्तायाः का स्थितिः आसीत्? किं सा पूर्णतया समाप्ता? एतस्मिन् विषये विमर्शं विना अपि ते देशाः कियन्तः समाजवादिनः साम्यवादिनः वा आसन् इत्येषः प्रश्नः महत्त्वपूर्णः वर्तते। यतो हि केचन जनाः मन्यन्ते यत् समाजवादस्य आगमनेनैव स्त्री–मुक्तेः लक्ष्यं स्वयमेव पूर्णं भविष्यतीति। वस्तुतः 'आधार' तथा 'अधिरचना' इत्येतयोः यान्त्रिकबोधस्य कारणादेव जनाः एवं

मन्यन्ते।। स्त्री-मुक्तेः प्रश्नः एव न, अपि तु जातेः प्रश्नः अपि चिरकालं यावत् एवमेव दृष्टः। केचन जनाः स्त्री-मुक्तेः (लिङ्गसन्दर्भे) प्रश्नं केवलं 'अधिरचना' सम्बद्धं मन्यन्ते। ते मन्यन्ते यत् क्रान्त्याः पश्चात् यदि 'आधारः' परिवर्तते, तर्हि 'अधिरचना' स्वतः परिवर्तिष्यते इति। एवं चेत् स्त्री-मुक्तेः प्रश्नः अपि समाप्तः भविष्यति। पितृसत्ता अपि पूर्णतया नष्टा भविष्यति इति। एवं चिन्तकाः जनाः आधारेण सह पितृसत्तायाः जटिल-संबन्धान् उपेक्षन्ते। अपरतः केचन जनाः पितृसत्तायाः भौतिकम् आधारं प्रमुखतया पश्यन्ति। तेन एते जनाः पितृसत्तां केवलं 'आधार' सम्बद्धां स्वीकुर्वन्ति। एषा चिन्तनप्रणाली निष्कर्षरूपेण एवं विकसिता भवति यत् उत्पादन-सम्बन्धः परिवर्तते चेत्, उत्पादनप्रक्रिया परिवर्तते। तदा स्त्री-मुक्तिः अपि स्वतः सिद्धा भविष्यति। एवं स्थितौ एतत् कथनम् आवश्यकं यत् पितृसत्तात्मक-व्यवस्था भौतिकाधारेण सांस्कृतिक्या अधिरचनया च सह अविच्छिन्नरूपेण सम्बन्धिता अस्ति। यदि एकम् एव विशेषं गुरुतरं मन्यते, तर्हि एषः जटिलः अन्तःसम्बन्धः अवगन्तुं न शक्यते। एतदपि स्मर्तव्यं यत् 'आधारः' परिवर्तते चेत् तथापि 'अधिरचना' पूर्णतया न परिवर्तते। यदि एतयोर्मध्ये तावान् सरलः सम्बन्धः एव अभविष्यत्, तर्हि अनेकाः समस्याः स्वतः नष्टाः अभविष्यन्। अतः, आधाराधिरचनयोः द्वन्द्वात्मकं सम्बन्धम् उपेक्ष्य एतयोः परस्परता नावगन्तुं शक्यते। यद्यपि समाजवादिदेशेषु स्त्री-मुक्तिः पूर्णरूपेण न सम्पन्ना, तथापि स्त्रीणां स्थितिः किञ्चिद् भद्रतरा जाता। धनाधिपत्यवादस्य अपेक्षया स्त्री-मुक्तेः कृते समाजवादिव्यवस्था अधिका अनुकूला अस्ति।

स्त्री-मुक्तेः कल्पितादर्शस्य रचना जटिला अस्ति यतोहि स्त्रियाः परिचयः केवलं "स्त्री"रूपेण नास्ति। भवितुम् अपि न अर्हति। तस्मात् स्त्रीणां समस्याः अपि विविधस्तरभेदैः युक्ताः सन्ति। स्त्री स्वयं कोऽपि 'वर्गः' नास्ति। स्त्रीत्वेन एव सर्वासां स्त्रीणां सर्वाः समस्याः समानाः न भवितुं शक्नुवन्ति, न च सर्वासां हितं समानं स्यात्। तथापि सर्वाः स्त्रियः केनापि रूपेण शोषणग्रस्ताः भवन्ति। उदाहरणतः धनिका स्त्री दरिद्रा स्त्री च उभयोः शोषणं भवति। किन्तु एताः एकवर्गीयाः न भवन्ति इति अस्मात् कारणात् तासां वर्गीयं हितम् अहितं वा संविभक्तं न भवति। संभवमस्ति यत् धनिका स्त्री स्वगृहे पितृसत्तायाः शोषणेन ग्रस्ता स्यात् तथा च स्ववर्गीयहिताय दरिद्रस्त्रियाः शोषणं कुर्वती स्यात्। अन्येन प्रकारेण जातिधर्मवर्गैः सह स्त्री स्वस्य पृथक् तन्त्रम् अपि निर्माति। वक्तुं शक्यते यत् तस्मात् जैविक-सामाजिकलिङ्गभेदयोः दृष्ट्या स्थूलसमानतायां सत्यामपि अयं स्तर-भेदः "सार्वभौमिक-भगिनीस्नेहस्य" मार्गे अवरोधः अस्ति। किम् एते स्तरभेदाः पूर्णतया उपेक्षणीयाः सन्ति? प्रसङ्गवशात् स्त्री-मुक्तिविमर्शकाणां मते जैविक-लिङ्गं (Sex) तथा च सामाजिक-लिङ्गं (Gender) एकं न भवतः। अवधेयास्पदं वर्तते यत् जैविकलिङ्गं (Sex) इत्युक्ते जैविकी संरचना अस्ति। सामाजिकलिङ्गं (Gender) इत्युक्ते सामाजिकलिङ्गसंरचना अस्ति। सेक्स् इति जैविकं प्राकृतिकं वा भवति, जेण्डर्(समाजशास्त्रिणा डॉ. सुभाषशर्मणा प्रस्तावितः शब्दः 'लिङ्ग-भावः') इति जैविकं प्राकृतिकं वा न भवति। सामाजिकलिङ्गस्य निर्माणं विभिन्नसत्ताभिः ऐतिहासिकरूपेण सामाजिक-सांस्कृतिक-मूल्य-मान्यताधारे कृतम्। उच्यते यत् स्त्री शरीरगत- लिङ्गदृष्ट्या (सेक्स्) पुरुषात् भिन्ना अस्ति। किन्तु, लिङ्ग-भावस्य (जेण्डर) भिन्नतायाः निर्माणं पितृसत्तया स्वार्थाय स्त्रीभ्यः विविधभूमिकाप्रदानाय हीनत्व-प्रतिष्ठायै च कृतम्। अनया दृष्ट्या जैविक-सामाजिक- लिङ्गयोर्मध्ये महान् भेदः दृश्यते। पितृसत्तया लिङ्ग-भावस्य स्वाभाविक-प्राकृतिक-गुणरूपेण प्रचारः प्रसारश्च कृतः। अस्मादेव लिङ्गभावात् मुक्तिश्चेत् स्त्री-मुक्तिः अस्ति। निस्सन्देहम्, स्त्री-मुक्तेः कल्पितादर्शस्य रचयितृभिः स्त्रियाः स्तरभेदाः स्मर्तव्याः। स्त्रीणाम्

अन्तर्विद्यमानस्य परस्परविरोधिपरिचयस्य अनेकानि रूपाणि भवितुम् अर्हन्ति। एतेषां रेखाङ्कनेन स्त्री-मुक्तेः कल्पितादर्शः (यूटोपिया) दुर्बलो न भविष्यति, अपि तु अधिकः सार्थकः, विश्वसनीयः, कार्यक्षमश्च भविष्यति। एषः स्तरभेदः एकम् आह्वानं नूनं प्रस्तोष्यति, परन्तु मुक्तेः दृढो महांश्च मार्गः अस्मादेव उद्गमिष्यति। जाति-वर्गाभ्यां विमुक्तस्य लिङ्गभावस्य बोधः मुक्तिकारिणः कल्पितादर्शस्य दृढाधारं निर्मातुं न शक्नोति। सममेव यावत् सर्वाः स्त्रियः एतस्मिन् कल्पितादर्शे स्थानं न प्राप्नुवन्ति तावत् तस्य कल्पितादर्शस्य संरचना पूर्णतया सफला न भविष्यति। कथनस्य तात्पर्यमिदं यत् स्त्रीमुक्तेः कल्पितादर्शस्य कृते एतत् न वक्तव्यं यत् प्रथमतः अस्याः श्रेण्याः स्त्री मुक्तिं प्राप्स्यति, पश्चात् अपरस्याः। यद्यपि स्त्रीणां मध्ये परस्परविरोधाभासाः सन्ति तथापि सर्वाः स्त्रियः पितृसत्तया शोषिताः सन्ति। अपि च सर्वाभ्यः स्त्रीभ्यः मुक्तिकामी कल्पितादर्शः अपेक्षितः वर्तते।

यदा यदा स्त्री-मुक्तेः चर्चा भवति, तदा पितृसत्तात्मक-व्यवस्थायाः रक्षकाः स्त्रियं भीषणरूपेण प्रचारयन्ति। एते जनाः स्त्रीणां विषये 'एताः पुरुषद्वेषिण्यः, परिवार-भञ्जिकाः इत्यादि मिथ्या प्रचारं प्रसारं च कुर्वन्ति। ते मन्यन्ते यत् एतासां नास्ति कोऽपि देशी संस्कारः। वस्तुतः स्त्री-मुक्तेः स्वप्नद्रष्ट्रीणाम् अथवा अस्यां दिशि चिन्तनं मन्थनं च कुर्वतीनां स्त्रीणां न कोऽपि एकरूपः विचारप्रवाहः अस्ति, न च एकमेव स्त्रीमुक्तिपरिकल्पनारूपम् अस्ति। एवं महोद्देशः इव अत्रापि नानाविधवैचारिकसरणिषु विश्वासिनो जनाः सक्रियाः सन्ति।

कोऽपि अस्मितावादी मुक्तिकामी समुदायः स्वात्मनि कृतदुराचारान् जनान् प्रति द्वेषम् उत्पाद्य स्वीयास्मितां प्रति ध्यानस्य आविष्करणं तथान्यजनान् प्रति विरोधभावस्य माध्यमेन स्व-समूहस्य जनानाम् एकत्रीकरणं सरलं भवति। विचारणीयमिदं यत् एषा द्वेषप्रवृत्तिः वर्धते चेत् काऽपि मुक्तिकामिनी परियोजना सफलतायाः स्थाने प्रभुत्वशक्तिरूपेण प्रपत्स्यते। ततः परम् एषा लोकतान्त्रिकव्यवस्थायाः स्थाने एतेषां मूल्यानां कृते स्वयमपि शत्रुः भविष्यति। अतः कस्यापि मुक्तिकारिणः समूहस्य कल्पितादर्शे तस्य अन्यस्य विषये का भावना अस्ति, एतद्द्वारा तस्य कल्पितादर्शस्य परीक्षणं नितान्तम् अनिवार्यं भवति। एतत् सौभाग्यम् यत् स्त्री-समूहेषु 'अन्यम्' (अर्थात् पुरुषम्) प्रति द्वेषभावनाः न दृश्यन्ते। एतासां स्पष्टा धारणा अस्ति यत् 'अस्माकं सङ्घर्षः पितृसत्तायाः विविधस्वरूपैः सह अस्ति, न तु पुरुष-व्यक्ति-सत्ताभिस्सह।' स्त्री-मुक्तेः कल्पितादर्शे पुरुषाणां कृते अपि समानाधिकाराः स्थानानि च स्युः। निस्सन्देहम् एताः स्त्रियः द्वेषिण्यः न, प्रत्युत समाजे समानतां प्रेम सौहार्दं च स्थापयितुम् इच्छन्ति। यदि "कौटुम्बिक-संरचना" स्वस्य लोकतान्त्रिकरूपेण परिवर्तनं न करोति, पितृसत्तायामेव स्थातुम् इच्छति, तर्हि अस्याः अस्तित्वं किमर्थम् आवश्यकम्? पितृसत्ताधृते वर्तमाने 'परिवारे' लोकतान्त्रिक-निर्माणस्य प्रक्रियावधौ सम्बन्ध-विच्छेदः उत्पत्स्यते। ततः नवीनकुटुम्बस्य सर्जनं भविष्यति। अस्मिन् नवीने 'कुटुम्बे' (किं वा, अन्येन नाम्ना ख्याते) स्त्री-पुरुषयोः समानता भविष्यति। उभयोः समानाधिकारः भविष्यति। किम् एतत् पुनः पुनः वक्तव्यम्? एषा व्यवस्था केवलं स्त्रीणां कृते एव न, अपि तु पुरुषाणामपि हिताय आवश्यकी एव। यस्य स्तनच्छादक-दाहनस्य (Bra Burning) पुनः पुनः चर्चा क्रियते, तदपि सम्यक् प्रकारेण बोधितव्यम्। तथ्यतः मुक्तिकामिनीभिः स्त्रीभिः 'स्तनच्छादक-दाहनम्' 'लिङ्गभावेन' सह संयोज्य दृष्टम्। अमेरिकादेशे सम्पन्नायां "विश्वसुन्दरी-स्पर्धायां" स्त्रीवादिनीभिः स्वस्व स्तनच्छादकम् एकस्मिन् अवकरपात्रे निक्षिप्तम्। ताः स्त्रियः निवेदनम् अपि अकुर्वन् यत् स्तनच्छादकं परतन्त्रतायाः प्रतीकम् अस्ति। तस्मात् त्याज्यम्

इदम्। तासां स्त्रीणां मतम् आसीत् यत् स्तनः शिशोः पोषणाय एव, न तु पुरुषस्य भोगाय। पुरुष-सत्तया स्त्री-शरीरस्य इदम् अङ्गम् आकर्षणाय, भोगाय च ब्रा-नाम्ना एकस्मिन् नियते आकारे नियोजितम्। तात्पर्यमिदं यत् स्त्रीलिङ्गस्य अङ्गमिदं स्तनच्छादकेन (ब्रा-द्वारा) सामाजिक-लिङ्गरूपेण परिवर्तितम्। अतः परतन्त्रतायाः प्रतीकमिदं दग्धव्यमिति आवश्यकम्। अवधेयास्पदं यत् आधुनिकः स्त्रीवादः अस्मात् चिन्तनात् अतीव प्रगतः अस्ति। अन्यतः, 'स्तनच्छादक-दाहन' विषयिणी या चर्चा अस्ति सा अत्यधिकं हाहाकारं नार्हति। यथा गर्भपाताधिकाराय प्रवृत्ते आन्दोलने सीमोन द बोउवार् इत्यादयः फ्रांसदेशीयाः स्त्रीवादिन्यः स्त्रियः गर्भपाताधिकाराय हस्ताक्षरं कृत्वा सार्वजनिकरूपेण स्वीकारम् अकुर्वन् यत् ताः स्वजीवने गर्भपातं कृतवत्यः इति। गर्भपातः तासाम् अधिकारः अस्ति; तमधिकारं वैधानिकरूपेण ताः प्राप्नुयुः। वैधानिकाधिकारप्राप्त्या सहैव समाजे गर्भपातं प्रति विद्यमाना 'सामाजिकवर्ज्यता' अपि समाप्ता। अतः एताः ऐतिहासिकीः घटनाः तत्सन्दर्भे एव निरीक्ष्य सम्यक्तया अवबोद्धुं शक्यन्ते। निस्सन्देहम् एतादृशी अपेक्षा स्त्री-पुरुष-समानतायां विश्वासवद्भ्यः एव कर्तुं शक्यते। पितृसत्ताध्वजवाहकेभ्यस्तु न।

स्त्रीवादस्य एवं च स्त्री-मुक्तेः कल्पितादर्शस्य समर्थकानां देशी-संस्काराः न सन्ति इति आरोपः वर्तते। एवम् उक्त्वा इमाः वैदेशिकमान्यताः सन्ति अपि च एतासां अत्रत्येन अतीतेन सभ्यतया संस्कृत्या च सह नास्ति कोऽपि सम्बन्धः इति एतं विचारं प्रसारयितुं यथाशक्ति प्रयत्नः क्रियते। भारतीय-स्त्रीणामपि अनया मुक्त्या सह कोऽपि सम्बन्धः नास्ति। तथापि किं नाम कापि विचारधारा वैचारिकसरणिर्वा केवलं स्वदेशे न जायते चेत् सा न अङ्गीकरणीया किम्? यदि लोकतन्त्राधुनिकतासदृश-मान्यताः विदेशात् आगतास्सन्ति तर्हि किं ताः परित्याज्याः? एतादृश्यः कूपमण्डूक-वृत्तयः सदा स्मरणीयाः। विदेशसम्भूतः सन्नपि अपि कश्चन विचारः मानवतायै हितकरश्चेद् अवश्यमसौ ग्राह्य एव। अपरेण पक्षेण स्त्री-मुक्तेः देशी-संस्काराः अत्र विद्यमानाः आसन्। स्त्रीवादि-बुद्धिधर्मिभिः तद्विषये गम्भीर-निरीक्षणं कृत्वा अस्माकं महत्त्वाधायिरिक्थस्य विवेचनं विश्लेषणं च कृतम्। यदारभ्य पितृसत्ता प्रवृत्ता तस्य प्रतिविरोधाय स्त्रीस्वरः अपि प्रकटितः। किं तेषु स्वरेषु मुक्तिकामना न स्फुटते? आर्तता-पूर्णेषु तेषु स्वरेषु मुक्तेः गहनलालसायाः मध्यमः रागः अपि लहरति। गार्गी, थेरीगाथास्त्रियः, आण्डालः, अक्कमहादेवी, मीराबाई, सहजोबाई, रमाबाई, ताराबाई शिन्दे, महादेवीवर्मा चादीनां स्त्रीणां स्वरे दुःख-प्रतीतिः पितृसत्ता-विरोधश्च विद्येते। पितृसत्ता अनेकस्तरेषु कार्यं कृतवती। स्त्रीस्वरस्य दमनादारभ्य स्त्रीविचारनाशं यावत्। पितृसत्तायाः प्रत्यक्षहिंसा तु दृश्यते परन्तु वाग्विरोधाय क्रियमाणा परोक्षहिंसा शीघ्रं न गोचरीभवति। एषा स्थितिः आसीत् यत् निकटे अतीते 'सीमन्तिनी उपदेश' इत्यस्य लेखिका 'काचित् अज्ञाता हिन्दूस्त्री' विद्यमाना आसीत्। अद्यापि तस्याः वीरस्त्रियाः नाम न ज्ञातम्। नूनं तस्याः परोक्ष-हिंसायाः दुष्परिणाम एष।

नास्ति यत् पितृसत्तायाः विरोधिन्यः इमाः स्त्रियः केवलं भारते यूरोपे वा अभवन्। यथा सर्वेषु राज्येषु पितृसत्ता आसीत् तथैव तस्याः विरोधिन्यः अपि आसन्। उदाहरणाय नातीव प्राचीनसमये प्रत्युत निकटे अतीते एकोनविंशशताब्द्यां पश्येम चेत् तदा जिउ जिन् (चीन), सुगला एवं गजमन् नोना (श्रीलङ्का), कार्तिनी (इण्डोनेशिया), कुर्रत्-उल्-ऐन् (ईरान) इत्यादयः बहवः वीरस्त्रियः प्रत्येकस्मिन् राष्ट्रे प्राप्यन्ते। अद्यतनदृष्ट्या पश्येम चेत् पितृसत्तायाः विरोधेन सहैव एतासां सीमाः अपि दृष्टिपथम् आगच्छन्ति। स्वीयम् इदं रिक्थं नैव तु उपेक्ष्य न च भृशं प्रशस्य बोद्धुं शक्यते। रिक्थस्य सर्जनात्मकविकासाय गुण-दोषान् मनसि निधाय विमर्शः

आवश्यक: कार्यक्षमश्चापि भवति।

स्वदेशे स्वातन्त्र्यसङ्ग्रामेण स्त्रियः गृहसीमायाः बहिर्निर्गत्य समादृताः। तस्मिन् समये महता प्रमाणेन स्त्रियः सामाजिकराजनैतिककार्येषु भागं गृहीतवत्यः। स्त्रीसम्बद्धः प्रश्नः अपि राजकीयप्रश्नरूपेण तस्मिन्नेव काले प्राकाश्यमागतः। गृहस्य प्राकाराद् बहिर्निर्गत्य सामाजिकराजकीयेषु कार्येषु स्त्रीणां प्रवृत्तिः, सभासु संगोष्ठीषु च भागग्रहणं स्त्रीमुक्तेः दिशि महती प्रगतिरेव। एतदर्थं स्वातन्त्र्यसङ्ग्रामस्य नेतॄन् प्रति कृतज्ञता प्रकटनीया। किन्तु एतदपि स्मरणीयं यत् दलित-श्रमिक-कृषकैः सम्बद्धः प्रश्नः इव स्त्रिया सम्बद्धः प्रश्नोऽपि तासां कृते स्वातन्त्र्यसङ्ग्रामस्य एव समस्या आसीत्, न तु पृथक् स्त्रीमुक्तेः प्रश्नः। तस्मिन् युगे राष्ट्रवादिनेतारः स्त्रीसम्बद्धां समस्यां स्वीयदृष्ट्या स्वातन्त्र्यसङ्ग्रामदृष्ट्या च समीक्ष्य समुत्थापितवन्तः। स्त्रियः गृहस्य बहिः आनीय आन्दोलनेन सह तासां समावेशनं तेषाम् ऐतिहासिकी आवश्यकता आसीत्। एतदेव कारणमस्ति यत् १९१७ तमे वर्षे सरोजनी नायडू इत्यस्याः नेतृत्वे स्त्रीणां प्रतिनिधिमण्डलं माण्टेस्क्यू इत्यनेन सह समागत्य काँग्रेस-मुस्लिमलीग-सभानाम् एकोनविंशत्या शासनेतर-सदस्यानां द्वारा उत्थापितायै स्वराज्ययाचनायै नैजं समर्थनं दत्त्वा स्त्रीप्रश्नः पृथक्तया उत्थापितः। स्वातन्त्र्यसङ्ग्रामस्य केचन नेतृत्वकर्तारः स्वयं 'जेंडर' इत्यस्य धारणया ग्रस्ताः आसन्। ते मन्यन्ते स्म यत् यानि कार्याणि स्वातन्त्र्यसङ्ग्रामे पुरुषैः कर्तुं शक्यानि, तानि स्त्रीभिः न कर्तुं शक्यन्ते। एतस्य स्पष्टतायै महात्मना गान्धीमहोदयेन आहूतः 'लवणसत्याग्रहः' स्मर्तव्यः। गान्धीमहोदयः स्वातन्त्र्यसङ्ग्रामे भागं ग्रहीतुं स्त्रियः प्रेरयति स्म; परन्तु लवणसत्याग्रहाय प्रवृत्तायां 'दाण्डीयात्रायां' भागं ग्रहीतुं ताः नानुज्ञाताः। स मन्यते स्म यत् स्त्रियः दीर्घं मार्गं गत्वा क्लान्ताः भविष्यन्ति। सरोजिनी नायडू-सहिताः कतिपयस्त्रियः गान्धिनः निषेधस्य विरोधं अकुर्वन्, दाण्डीयात्रायां भागं ग्रहीतुं च दृढनिश्चयं प्रकटितवत्यः। तासां दृढनिश्चयकारणात् गान्धीजी अनन्तरम् अनुमतिं प्रायच्छत्। दाण्डीयात्रायां तत्परिणतिरूपे लवणसत्याग्रहे च सम्मिलिताः स्त्रियः गान्धीवर्यस्य पूर्वमान्यताम् असत्यां प्रमाणीकृतवत्यः अपि च ताः पुरुषाणाम् अपेक्षया अधिकं कार्यं कृतवत्यः। एवंविधाः बहवः प्रसङ्गाः सूचयन्ति यत् स्वातन्त्र्यसङ्ग्रामनेतॄणां मानसिकसंरचनायामपि 'लिङ्गभावस्य' पितृसत्तात्मकमान्यतानां अतीव प्रभावः आसीत्। अनेन सहैव केचन प्रसङ्गाः एतादृशोऽपि सन्ति यत्र भारतस्य स्त्रीभिः स्वाधिकाराय यूरोपस्त्रीणाम् अपेक्षया अत्यन्तं न्यूनः संघर्षः कर्तव्यः आसीत्। यूरोपस्त्रियः स्वकीयस्य राजनैतिकमताधिकारस्य प्राप्त्यर्थं दीर्घकालपर्यन्तं संघर्षं कृतवत्यः। १९२८ तमे वर्षे सम्पन्ने बम्बई-काँग्रेस-अधिवेशने सरोजिनी नायडूः सभानिर्वाचनेषु स्त्रीणां मताधिकारस्य प्रस्तावं प्रस्तुतवती। तस्य प्रस्तावस्य मदनमोहनमालवीयेन स्पष्टविरोधः कृतः। कालान्तरे तु सः प्रस्तावः पारितः अभवत्। अभिप्रायः अयं यत् स्त्रीणां पक्षे सहकार्यरूपेण स्वातन्त्र्यसङ्ग्रामे सम्मिलितः शिक्षितः मध्यवर्गः पुरतः समागच्छति स्म।

भारते स्त्रीवादस्य स्त्रीमुक्तेश्च समर्थनकर्तारः केवलं स्त्रीसम्बद्धं प्रश्नम् उद्धृत्य तत्कृते प्राणपणेन संघर्षं न कृतवन्तः। बोधगया-मुक्त्यान्दोलनं चिप्को-आन्दोलनम् आन्ध्रप्रदेशे च मद्यविरोधि-आन्दोलनम् इत्यादीनि स्त्रिभिः कृतानि आन्दोलनानि सन्ति, येषां कारणात् शासनं पतितम्। अपि च येषु विविधाः स्त्रीवादिन्यः महिलाः सम्मिलिताः आसन्। एतेषु सर्वेषु संघर्षेषु स्त्रीभिः पर्याप्तं साफल्यमपि प्राप्तम्। अनया दृष्ट्या विचार्यते चेत् भारतीय-स्त्रीमुक्त्यान्दोलनस्यायं निजविशेषः वर्तते अपि च तस्य विस्तारं व्याप्तिं च सूचयति।

स्त्री-मुक्तेः एकः कल्पितादर्शः एकशताब्द्याः पूर्वं रुकैयासावतहुसैनद्वारा 'सुल्ताना का स्वप्ना' इत्याख्यायां स्वकथायां निरूपितः। तदनुसारं पुरुषाः गृहे समस्तं कर्म कुर्वन्ति स्त्रियश्च बाह्यकर्मसु प्रवृत्ताः सन्ति। एतादृशस्य कल्पितादर्शस्य क्रियान्वितिप्रक्रिया द्वेषाधृता तु नैव आसीत्, परन्तु तत्र समस्तः क्रमः विपरीतः कृतः। वर्तमानः स्त्री-मुक्ति-विमर्शः अस्मात् बोधात् बहु प्रगतोऽस्ति। अधुना क्रमस्थितेः केवलं परिवर्तनं न क्रियते अपि तु सहभागिता स्वतन्त्रता समता च सुनिश्चीयन्ते।

अवधेयास्पदमिदं वर्तते यत् यथार्थं कल्पितादर्शश्च (यूटोपिया) मिथः पूर्णतः भिन्नौ न स्तः। उभयोर्मध्ये द्वन्द्वात्मकः सम्बन्धः विद्यते। यथार्थस्य घात-संघाततः विवेकतश्च कल्पितादर्शः (यूटोपिया) आकार-ग्रहणं करोति सममेव कल्पितादर्शः (यूटोपिया) अस्मभ्यं यथार्थस्य परीक्षणाय बोधनाय च बुद्धिम् अपि प्रयच्छति। येन वयं तस्य यथार्थस्य जटिलसंरचनायां निहितं वर्चस्वकारि रूपं ज्ञात्वा तदुन्मूलनदिशि प्रवर्तामहे। स्त्री-मुक्तेः कल्पितादर्शस्य रचना यथार्थस्य विभिन्नायामानां ज्ञानं विना न कर्तुं शक्यते। व्यवस्थायाः नानापक्षैः सह पितृसत्तायाः अन्योन्याश्रित-सम्बन्धः स्थापितो वर्तते। अतः एतान् सर्वान् पक्षान् सम्यक् मनसि निधाय एव स्त्री-मुक्तेः कल्पितादर्शस्य रूपरेखा निर्मातुं शक्यते। पितृसत्तायाः ऊर्णनाभजालं दृष्ट्वा एवं प्रतीयते यत् सम्पूर्णव्यवस्थायाः परिवर्तनं विना पूर्णतः स्त्री-मुक्तिः न सम्भवा। किन्तु निःसन्देहम् एकदा स्त्री-मुक्तेः कल्पितादर्शः (यूटोपिया) यथार्थरूपं प्राप्स्यति। मुक्तेः स्वप्नः तं यथार्थं प्रति निश्चितं प्रापयिष्यति। कवेः वेणुगोपालस्य कविताम् आश्रित्य कथयाम चेत्--

**'नास्ति चेत् किमपि**
**यद्यस्ति केवलं स्वप्नः,**
**तथापि आरम्भः सम्भवः**
**तथा चायम् आरम्भ एव खलु,**
**यत् तत्रास्ति कश्चन स्वप्नः।'**

**-सहायकाचार्यः, संस्कृतविभागः**
**मानविकी-विद्यापीठम् इग्नू, नवदेहली**

# न्यायमीमांसाव्याकरणसाहित्यदिशा लक्षणाविमर्शः

-अभिषेककुमारशुक्लः

प्राचीनदर्शनेषु साहित्यग्रन्थेषु शब्दार्थयोर्मध्ये काचन शक्ति भवति मतमिदं स्वीकृतम्। यतोहि तस्याः शक्तेर्विभागेषु नास्ति मतैक्यम्, किन्तु शब्दशक्तिस्सर्वैस्वीकृता नास्त्यस्मिन् काचित् विप्रतिपत्तिः। शक्तिस्त्रिधा उक्ता आचार्यैः। अत्र कथनमिदं सामान्येन निगदितम्। नैयायिकाः वृत्तिर्द्विधा स्वीक्रियते, शक्तिः उत वा अभिधा लक्षणा च। वैयाकरणाः स्पष्टरूपेण शक्तिः अभिधा वा व्यञ्जना च द्वे शक्ती स्वीकृतवन्तः यद्यपि अप्रसिद्धाभेदेन लक्षणामपि स्वीकृतवन्तः। तत्रैव मींमासकैः अभिधालक्षणातात्पर्याः तिस्रः वृत्तयः स्वीकृताः अत्र व्यञ्जनायाः गणना नास्ति, किन्तु साहित्यिकाः अभिधां लक्षणां व्यञ्जनाञ्च स्वीकृत्य त्रयात्मिकां वृत्तिमुल्लिलितिवन्तः। यथा वयं द्रष्टुं शक्नुमः यत् आचार्याः वैविध्यमावहन्ति किन्तु अस्मिन् विषये सम्यक्तया चर्चा कृता। लक्ष् धातोः करणे ल्युट् कृत्वा टाप् च कृते लक्षणा इति शब्दः निष्पन्नः। अस्य सामान्यार्थः भवति "अमुख्यः"। अस्मै शब्दाय शास्त्रेषु तावत् अमुख्यः, भक्तिः, गौणी, अप्रसिद्धा, उपचारः वृत्तिश्चानेकाः शब्दाः प्रयुक्ताः सन्ति। पृथक्पृथगाचार्याः पृथक्शब्दं प्रयुञ्जन्ति। वस्तुतस्तु लक्षणायाः विषये विशदं विवेचनं प्राप्यते अस्माभिः किन्तु मीमांसकप्राचीननैयायिक-वैयाकरणैः लक्षणायाः स्वरूपं विशेषेण न विवेचितमपितु सामान्येन सूत्ररूपेण वा निगदितम्, अनन्तरमाचार्याः तस्यास्स्वरूपं विस्तरेणोपस्थापितवन्तः। यद्यपि साहित्यिकैर्लक्षणायाः विवेचनं बहुशः कृतं परन्तु तस्मिन् न्यायमीमांसाव्याकरणदर्शनानामभूतपूर्वः प्रभावोऽभूदिति। तेषां दर्शनानां कीदृशः प्रभावः विद्यते साहित्यिकेषु तस्य चर्चामग्रे करिष्ये।

लक्षणा वृत्तिरस्तीदं प्रसिद्धमस्ति। यथा नागेशाचार्यैरप्युपस्थापितं परमताभिप्रायेण यत् **"सा च वृत्तिस्त्रिधा"**[१] अर्थात् सामान्येन वृत्तयः तिस्रः। अभिधा, लक्षणा व्यञ्जना च। यतोहि वैयाकरणाः लक्षणां खण्डनं कुर्वते अतः परमताभिप्रायेण लघुमञ्जूषायामुद्धृतमिदं वाक्यम्। यथा वैयाकरणाः लक्षणां तथैव मीमांसकाः नैयायिकाश्च व्यञ्जनामवमन्यन्ते। उपरोक्ताः तिस्रः साहित्यिकैरभिमताः।

## न्यायमते लक्षणायाः विवेचनम्

लक्षणायाः स्वरूपविषये उत वा लक्षणविषये प्राचीनास्तु पृथग् विचारान् नैवादधुः किन्तु प्रसङ्गवशात् अस्मिन् विषये किञ्चित् चर्चा अवश्यमेव कृता तैः। न्यायदर्शनस्यादिमः आधारभूतः ग्रन्थः "न्यासूत्रम्" इत्येवास्ति। तस्मिन्नपि किञ्चित् विशिष्टं लक्षणन्नैव कृतमस्ति यद्यपि पदार्थनिर्णयप्रसङ्गे किञ्चित् विवेचनमस्माभिर्प्राप्यते। यथा-

**"सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोग-साधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तु-चन्दनगङ्गाशाटकान्नपुरुषेषु अतद्भावेऽपि तदुपचारः"**[२] अत्र प्रसङ्गः यत् केवलं व्यक्तिर्नास्ति पदार्थः, ननु

१. परमलघुमञ्जूषा, शक्तिनिरूपणम्, पृ. १६

२. न्यायसूत्रम्, २.२.६०

नास्ति केवलं व्यक्तिर्पदार्थः तर्हि कथं व्यक्तौ तस्य प्रयोगः भवतीति अतः उपचारेण तस्य प्रयोगः भवति। यथोपरोक्तस्य न्यायसूत्रस्यात्रोदाहरणानि प्रस्तूयन्ते अवबोधनाय। **"यष्टिकां भोजय"** अर्थात् यष्टिकां भोजनं कारयत्वत्र सहचारसमवायात् यष्टिकावन्तं भोजयेत्यर्थः भवति, **"मञ्चाः क्रोशन्ति"** इत्यत्र स्थानवैशिष्ट्यात् मञ्चस्थाः क्रोशन्तीत्यर्थः। एवमेवोदाहरणानि अमीभिर्लभन्ते येषु लक्षणायाः बीजं विद्यमानमस्ति।

यत्र प्राचीनाः अस्मिन् विषये केवलं प्रसङ्गवशादेव चर्चां कृतवन्तः तत्रैव नव्यनैयायिकाः लक्षणाविषये विशदं विधिना चर्चयामासुः, यतोहि भाषा नव्यन्यायस्य प्रमुखेषु विषयेष्वन्यतमोऽस्ति लक्षणा च अर्थनिर्धारणे महत्त्वपूर्णं साधनमस्ति। नव्यन्यायस्य प्रवर्तकाः आचार्याः गङ्गेशोपाध्यायमहोदयाः आसन्, ते तत्त्वचिन्तामणौ शब्दशक्तिविषये सम्यक्तया विवेचनं कृतं तत्रैव लक्षणाया अपि लक्षणङ्कृतम्–

**"वाच्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः।**
**तत् सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते॥"**[3]

अर्थात् वाच्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तौ सम्बन्धवशात् प्राप्तमन्वयं लक्षणा अभिकथ्यते। तेषाम्मतमस्ति यत् शब्दात् परम्परया अशक्यान्वये असादृश्यान्वये चोपयोगिस्थितिरेव लक्षणा वर्तते।[4] प्रक्रियायामस्यां लक्षणाया अनभिधेयत्वं वाच्यार्थासादृश्यञ्चानिवार्यमस्ति।

एवमेव शब्दशक्तिप्रकाशिकायामपि जगदीशतर्कालङ्काराचार्यै लक्षणां लक्षयन्त उक्तवन्तः यत् यादृशार्थसम्बन्धवति यन्नाम सङ्केतितं तदेव तादृशार्थे लक्षकं यदि तादृशार्थे शक्तिशून्यं भवेत् यथा **"गङ्गायां घोषः"** इत्यत्र गङ्गापदस्य तीरादौ लक्षणा भवत्यतः गङ्गापदं लक्षकं वर्तते। यतोहि गङ्गापदं तीरादावसङ्केतितं तत्सम्बन्धिजलप्रवाहविशेषः शक्तत्वेन गृहीत एव, अतः तत्र गङ्गापदं तीराद्यन्वयं बोधयन् लक्षकं भवति। अर्थात् गङ्गापदस्यार्थोऽस्ति जलप्रवाहविशेषः तस्मिन्नेव गङ्गाशब्दः शक्तः अतः गङ्गाशब्दः तीराद्यर्थको नास्ति गङ्गाशब्दो वा तीरादौ शक्तिशून्योऽस्ति तर्हि तादृशार्थं बोधनाय अमुख्याशक्तेरावश्यकता विद्यते अतः गङ्गापदात् तीरादिलक्ष्यार्थं बोधनाय लक्षणा कर्तव्येति। यच्च पदं लाक्षणिकत्वेनाभिमतं तत्पदमेव लक्षकम्। फलतः गङ्गायां घोषः इत्यत्र तीरादौ तादृशार्थे गङ्गापदं शक्तिशून्यमस्त्यतः गङ्गापदमेव तादृशार्थे लक्षकमिति पर्यवसितम्। अमुं विषयं स्पष्टीकरणाय न्यायशैल्यां विवेचनं कृष्णकान्ताटीकायामपि सम्प्राप्तं यथा–

यादृशानुपूर्व्यवच्छिन्नं यद्धर्म–**विशिष्टयन्निरूपितशक्तिशून्यत्वे सति यद्धर्मविशिष्टयन्निरूपित सम्बन्धवन्निरूपितशक्तिनिरूपकं तद्धर्मप्रकारकतद्विशेष्यबोधकतादृशानुपूर्व्यवच्छिन्नं लक्षकमिति फलितम्।** अयमेव विषयः जगदीशतर्कालङ्कारैः शब्दशक्तिप्रकाशिकायां कारिकयोक्तः यथा–

**यादृशार्थस्य सम्बन्धवति शक्तन्तु यद्भवेत्।**
**तत्र तल्लक्षकन्नाम तच्छक्तिविधुरं यदि॥**[5]

एवमेव विश्वनाथपञ्चाननकृतायान्यायसिद्धान्तमुक्तावल्यामपि लक्षणाविषये विशदचर्चा विद्यमाना अस्ति। नैयायिकानाम्मते शक्यसम्बन्ध एव लक्षणा भवति, कीदृशः शक्यसम्बन्ध तर्हि तात्पर्यानुपपत्तितः शक्यसम्बन्धः।

---

३. तत्त्वचिन्तामणिः, चतुर्थखण्डः, लक्षणानिरूपणम्

४. शब्दात् परम्परयाशक्यासादृश्यान्वयपरोपस्थितिरूपा। त.चि. चतुर्थखण्डः, लक्षणानिरूपणम्

५. शब्दशक्तिप्रकाशिका, कारिका–२४

अर्थात् तात्पर्यस्य अनुत्पत्तौ सति यः सम्बन्धः वाच्यार्थस्य लक्ष्यार्थेन सह भवति तदेव सम्बन्धः लक्षणा, अस्मादिदमपि स्पष्टं यत् नैयायिकानाम्मते लक्षणासम्बन्धरूपा वर्तते। यथोक्तं पञ्चाननेन– **"लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः"।**[६] **"सा च शक्यसम्बन्धरूपा"।**[७] अस्मिन् कथने किञ्चित् विशिष्टमस्ति यतोहि सर्वे दार्शनिकाः लक्षणां सम्बन्धरूपा एवं नहि स्वीकुर्वन्ति यथा मीमांसकाः। ते लक्षणां ज्ञानरूपा अभिज्ञायन्ते। अस्मिन् विषये मीमांसकमताभिप्रायेण नागेशेन लक्षणमपि कृतं **"स्वबोध्यसम्बन्धो लक्षणा"**[८] शक्यसम्बन्धो लक्षणा इति लक्षणं स्वीक्रियेत् चेत् तर्हि **"गंभीरायां नद्यां घोषः"** इत्यत्र लक्षणायाः अनुपपत्तिः। इति मीमांसकाः।

एवमेव नागेशाचार्यैरपि न्यायमताभिप्रायेण लक्षणायाः विवेचनं कृतं यत्र लक्षणमस्ति **"स्वशक्यसम्बन्धो लक्षणा"**[९] यथा **"गङ्गायां घोषः"**, अत्र यत्पदं लाक्षणिकत्वेनाभिमतं तत्स्वपदग्राह्यम्। गङ्गापदं लाक्षणिकत्वेनाभिमतं तच्छक्यः भगीरथरथखातावच्छिन्नजलप्रवाहः तत्सम्बन्धी तीरादिः अतः शक्यार्थलक्ष्यार्थयोर्मध्ये उत वा शक्यसम्बन्धिनोः मध्ये जलप्रवाहतीरादिमध्ये च यः सम्बन्धः तिष्ठति स एव लक्षणा। तत्र सम्बन्धः सामीप्यम्। अर्थः जायते गङ्गातीरे गङ्गासमीपे च घोषः विद्यते।

### लक्षणायाः बीजम्

लक्षणायाः बीजं किमिति चिन्तने मतद्वयमस्माभिर्ज्ञायते। अन्वयानुपपत्तिस्तात्पर्यानुपपत्तिश्च। केचनाचार्यैरन्वयानुपपत्तिरभिमता केचनाचार्यैरितरा च। यथा साहित्यिकैरन्वयानुपपत्तिम् लक्षणायाः बीजमभिमतं तत्रैव नैयायिकैस्तात्पर्यानुपपत्तिं बीजं स्वीकृतमिति। "गङ्गायां घोषः" इत्यत्र गङ्गापदस्य मुख्यार्थः जलप्रवाहविशेष अस्ति तस्मिन् च जलप्रवाहे घोषवृत्तित्वमसम्भवमतः अत्रान्वयः अनुपपन्नः, गङ्गापदस्य तीरादौ लक्षणा कर्तव्येति साहित्यिकाः। अतः अन्वयानुपपत्तिरेव लक्षणायाः कारणमस्ति। तत्र नैयायिकाः केवलं तात्पर्यस्य अनुपपत्तिमेव लक्षणां प्रति कारणं मन्यन्ते यथोक्तं "तात्पर्यानुपपत्तितः।" **"वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्"**[१०] अर्थात् वक्तुः विवक्षा एव तात्पर्यमस्ति। अतः केवलं विवक्षायाः अनुपपत्तौ सत्येव लक्षणाविधानमिति तार्किकाः। कानिचनोदाहरणानि नीत्वा विशदीकृत्य वयमवबोधयितुं प्रयतामहे।

**अन्वयानुपपत्तिः –**

गङ्गायां घोषः इत्यत्र गङ्गापदस्य शक्यार्थे घोषावृत्तित्वमतोऽत्र अभिधया वाक्यार्थबोधः न भविष्यति यतोहि गङ्गापदस्य घोषपदेन सह अन्वयः असिद्धः, तर्हि गौणीवृत्या लक्षणया वा गङ्गापदस्य तटं, गङ्गासमीपं वा इति अर्थः जायते तदा गङ्गापदस्य अन्वयः तटेन सह भवति। अर्थात् यावत् मुख्यार्थबाधः न भवति, अन्वयः अनुपपन्नः नहि भवति तावत् लक्षणा अपि न सम्भवति।

**तात्पर्यानुपपत्तिः –**

उपर्यस्माभिः दृष्टं, साहित्यिकाः अन्वयानुपपत्तिं कीदृशः व्याख्यातवन्तः किन्तु अस्मिन्नेव विषये

६. कारिकावली, शब्दखण्डः, कारिका – ८२

७. तत्रैव.

८. परमलघुमञ्जूषा, लक्षणानिरूपणम्

९. परमलघुमञ्जूषा, लक्षणानिरूपणम्

१०. न्या.सि.मु. कारिका ८४

नैयायिकाः अन्वयानुपपत्तिं कार्त्स्न्येनावमन्यन्ते यथा– **"वस्तुतस्तु तात्पर्यानुपपत्तिप्रतिसन्धानमेव तद्बीजम्"।**[११] गङ्गायां घोषः इत्यस्मिन् स्थले अन्वयः उपपन्नः किन्तु तात्पर्यमेवानुपपन्नमस्ति अतोऽत्र लक्षणा। यतोहि अन्वयानुपपत्तिः लक्षणायाः प्रवृत्तिनिमित्तिका अस्ति चेत् घोषपदस्य मकरादौ लक्षणाप्रसङ्गः, मकरादौ लक्षणां विधाय अन्वयः उपपन्नः भवति तथापि वक्तुस्तात्पार्यमनुपपन्नम्। यतोहि वक्तुः तात्पर्यमिदमासीत् यत् गङ्गातीरे घोषः अस्ति, गङ्गायां मीनादिवृत्तीति न। अतः अत्रापि लक्षणायाः प्रवृत्तिनिमित्तं तात्पर्यस्यानुपपन्नत्वमेव। एवमेव अन्वयानुपपत्तौ **"गङ्गायां पापी गच्छति"** अत्र गङ्गापदस्य नरके लक्षणाप्रसङ्गः यद्यपि वक्तुर्नास्ति तादृशं तात्पर्यम्। तात्पर्यानुपपत्तौ सति पापीपदस्य भूतपूर्वपापावच्छिन्नपुरुषे लक्षणा भविष्यति तदेव तात्पर्यमपि।[१२] अन्यच्च "नक्षत्रं दृष्ट्वा वाचं विसृजेत्" इत्यत्रान्वयसम्भवेऽपि तात्पर्यानुपपत्तित एव लक्षणाविधानम्, नक्षत्रपदस्य नक्षत्रदर्शनयोग्य–काल इत्यस्मिन् लक्षणा कर्तव्या।[१३]

एवमेव यदि वयं लक्षणायाः बीजमन्वयानुपपत्तिं स्वीकुर्मः तर्हि **"यष्टीः प्रवेशय", "काकेभ्यो दधिरक्ष्यताम्", "छत्रिणो यान्ति"** इत्यादिस्थलेषु लक्षणा नैव भविष्यति, क्रमशः यष्टिषु प्रवेशान्वयसम्भवादतः तात्पर्यानुपपत्तितः यष्टिधरेषु लक्षणा, काके दध्युपघातकत्वान्वयोपपत्तित्वादतः तात्पर्यानुपपत्या काकपदस्य काकसहितसर्वदध्युपघातके लक्षणा, छत्रिषु गमनक्रियान्वयसम्भवादतः तात्पर्यानुपपत्या छत्रिपदस्य एकसार्थवाहित्वे लक्षणेति तार्किकाः।

### लक्षणायाः विभाजनम्

नैयायिकाः लक्षणायाः भेदद्वयं स्वीकुर्वन्ति। यस्य विवेचनं न्यायसिद्धान्तमुक्तावल्यामपि प्राप्तम्। अजहत्स्वार्था[१४] जहत्स्वार्था च। अजहत्स्वार्थामेव साहित्यिकाः उपादानलक्षणेति नाम्ना अभिधीयन्ते, जहत्स्वार्थां लक्षणलक्षणा। जहति स्वानि यम् अर्थं सः जहत्स्वः, जहत्स्वः अर्थो यस्यां सा जहत्स्वार्था। न जहत्स्वार्था इति अजहत्स्वार्था। अजहत्स्वार्था ईदृशी लक्षणा या स्वार्थमजहत् अन्यार्थं गृह्णाति, या स्वार्थं नहि परित्यजति किन्तु स्वार्थसहितमन्यमर्थं स्वीकरोति। तत्रैव जहत्स्वार्था लक्षणा स्वार्थं जहत् अन्यमर्थं स्वीकरोति अर्थात् स्वार्थं परित्यज्य अन्यार्थं बोधयति सा जहत्स्वार्थेति। एवमेव विवेचनं न्यायसम्मतं नागेशः अपि कृतवान् मञ्जूषायाम्। तत्रापि अजहत्स्वार्थाजहत्स्वार्थाभेदात् द्विविधैव लक्षणा, तत्र लक्षणमपि कृतं तेन, यथा आदिमा– **"स्वार्थसंवलितपरार्था–भिधायिका अजहत्स्वार्था"**[१५] अर्थात् या स्वार्थसहितं परार्थमप्यभिधत्ते सा वृत्तिरजहत्स्वार्था। यथा– छत्रिणो यान्ति, कुन्तान् प्रवेशय, यष्टीः प्रवेशय, काकेभ्यो दधिरक्ष्यताम् एतानि कानिचनोदाहरणानि सन्ति। **"छत्रिणो यान्ति"** अत्र छत्रिन् पदं छत्रिशब्दस्यार्थं बोधयन् सेना इत्यर्थस्यापि लक्षकं वर्तते, **"कुन्तान् प्रवेशय"** अमुष्मिन् स्थले कुन्तपदं स्वार्थमुपस्थापयन्नेव पुरुषमाक्षिप्यते अतः कुन्तास्त्रसहितपुरुष इत्यर्थः, **"यष्टीः प्रवेशय"** इत्यत्र यष्टिपदं स्वार्थसहितं यष्टिधरान्नपि लक्षयति। **"काकेभ्यो दधिरक्ष्यताम्"** अत्र काकशब्दः काकसहितसर्वदध्युपघातकान् बोधकः।

---

११. परमलघुमञ्जूषा, लक्षणानिरूपणम्

१२. परमलघुमञ्जूषा, लक्षणानिरूपणम्

१३. परमलघुमञ्जूषा, लक्षणानिरूपणम्

१४. इयमेवाजहत्स्वार्था लक्षणेत्युच्यते। न्या.सि.मु. शब्दखण्डः, लक्षणानिरूपणम्

१५. परमलघुमञ्जूषा, लक्षणानिरूपणम्

अत्रेदं ध्यातव्यं यत् अस्यां लक्षणायां यत्पदेन स्वार्थसहितान्यो अर्थो लक्ष्यते तत्पदशक्यार्थोऽपि लक्षणयैवोपस्थास्यते। यथा काकेभ्यो दधिरक्ष्यताम् अत्र काकपदस्य सर्वदध्युपघातके लक्षणा किन्तु अत्र काकपदस्य शक्यार्थः अस्ति कृष्णवर्णीयः पक्षिविशेषः तदर्थोऽपि लक्षणयैव उपस्थितो भविष्यति, यतोहि मैवं मन्यते तर्हि वृत्तिद्वयप्रयोगप्रसङ्गः अर्थात् एकबारं काकपदशक्यार्थः अभिधया बोध्यते चेत् तर्हि काकपदस्य अन्ये अर्थे लक्षणा नहि सम्भवः यतोहि एकशक्तिरेकबारमेव प्रयोक्तव्या यथोक्तं मम्मटेन कारिकां स्वां व्याख्यायन् **"विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे"।**[१६]

लक्षणाया अपरः भेदः जहत्स्वार्थेति यस्याः लक्षणं मञ्जूषायामेव कृतमस्ति –**"स्वार्थपरित्यागेनेतरार्था-भिधायिकाऽऽन्त्या"**[१७] अर्थात् स्वार्थं त्यक्त्वा अन्यस्यार्थस्य अभिधानं करोति सा जहत् स्वार्था। जहति स्वानि यम् अर्थं सः जहत्स्वः, जहत्स्वो अर्थो यस्यां सा जहत्स्वार्था। यथा "गङ्गायां घोषः" इदमुदाहरणं प्रसिद्धमस्ति। अत्र गङ्गापदं स्वार्थं पूर्णतया परित्यज्य तद्युक्तं तटमर्थं बोधयति। तत्र मञ्जूषायामेव लक्षणायाः प्रकारान्तरेण अन्येऽपि भेदाः कृतास्सन्ति यथा– गौणीशुद्धाभेदात् द्विधा, प्रयोजनवती रूढा च।

## मीमांसामते लक्षणायाः विवेचनम्

मीमांसकाः अपि लक्षणां स्वीकुर्वन्त्येव इति वयं जानीमः किन्तु लक्षणायाः किञ्चित् स्वरूपं भिन्नमस्ति। यद्यपि सर्वेषु शास्त्रेषु लक्षणा अमुख्या वृत्तिरेव स्वीकृता अस्ति तथैव मीमांसादर्शने लक्षणा एकः दोषसंज्ञकः उपायः वर्तते अर्थनिर्धारणे। अभिधेयार्थस्य अप्राप्ते सति ये अर्थोपलब्धेः साधकाः उपायाः सन्ति ते उपायाः दोषसंज्ञकाः भवन्ति। अतः लक्षणा अपि दोषसंज्ञक एव। यथा **"तत्र लक्षणैव हि दोषः।"** मीमांसासूत्रानुसारं शब्दस्य अर्थद्वयं भवति। मुख्योऽर्थः गौणार्थश्च। यथोक्तं जैमिनिना– **"गुणमुख्यविशेषणाच्च ",**[१८] यद्यपि मीमांसासूत्रशाबर-भाष्ययोः द्वयोः लक्षणायाः लक्षणन्नैव प्राप्यते अस्माभिः परन्तु कुमारिलभट्टादिमनीषिभिः शाबरभाष्ये उल्लिखितम् "उत्पत्तिर्हि भाव उच्यते लक्षणया" इत्यस्याधारे लक्षणायाः विवेचनाय अयतत।

आचार्यकुमारिलभट्टः परार्थप्राप्तये वृत्तिद्वयं स्वीकृतवान्। लक्षणा गौणी च। अस्य मते अभिधेयात् सम्बन्धितार्थस्य बोधिका वृत्तिर्लक्षणा अस्ति, तत्रैव लक्ष्यमाणवृत्तेः गुणयोगस्यापेक्षाकारणात् सा गौणी। गुणादागता गौणीति। यथोक्तमस्ति– **"अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता।।"**[१९] अर्थात् यथा आकृतिवचनः शब्दस्तत्सहचरितां व्यक्तिं लक्षयति तथैव यष्टीः प्रवेशय, मञ्चाः क्रोशन्ति, अश्वसहस्रेणामुको राजा जित इत्यादिषु स्थलेषु यष्टिमञ्चाश्वादयस्तत्सम्बद्धपुरुषलक्षणार्थाः भवन्ति। वाक्यार्थस्य विचारः मीमांसादर्शनस्य मुख्यः विचारः अस्ति तत्र भाट्टमीमांसकाः वाक्यार्थमपि लक्ष्यार्थरूपः मन्यन्ते। वर्णाः साक्षात् पदार्थानामेव प्रतिपादकाः भवन्ति तथापि पदार्थप्रतिपादनं तत्प्रयोगस्य प्रधानोद्देश्यन्नास्ति, यतोहि पदार्थास्तु अन्यप्रमाणेभ्य एव सिद्धास्सन्ति। पदप्रयोगस्य प्रधानोद्देश्यन्तु वाक्यार्थबोधः एव। अतः यथा पाकः एव काष्ठानां प्रधानोद्देश्यमस्ति, ज्वलनक्रिया तु नान्तरीयकतया एव तेभ्यः जायते। अर्थात् काष्ठेभ्यः ज्वलक्रियां विना पाकस्य

१६. काव्यप्रकाशः, कारिका १० इत्यस्य व्याख्यायाम्

१७. परमलघुमञ्जूषा, लक्षणानिरूपणम्

१८. मीमांसासूत्रम्, १०.०१.१०.३९

१९. तन्त्रवार्तिकम्, १.४.२२

निष्पादनं नैव भवितुं शक्यते अतएव काष्ठैर्ज्वलनक्रिया उत्पद्यते तथैव प्रधानोद्देश्यन्तु वाक्यार्थबोधः एव किन्त्वयं बोधः पदार्थोपस्थितिं विना नैव भविष्यति। अतः पदेभ्यः पदार्थोपस्थितिर्भवति तस्माच्च वाक्यार्थबोधः। मीमांसादर्शने लक्षणायाः स्वरूपं ज्ञाप्यसम्बन्धरूपात्मकमस्ति **"गम्भीरायां नद्यां घोषः"** इत्यत्र शक्यसम्बन्धरूपा लक्षणा असम्भवत्यतः ज्ञाप्यसम्बन्धस्वरूपा सिद्धा।

अन्या च गुणानां दर्शनपूर्वकं अन्यार्थस्य निर्वाचकः शब्दः गौणः वृत्तिश्चेयं गौणी। यथा- गौर्वाहीकः, अग्निर्माणवकः इत्यादयः। एवम्प्रकारेण मीमांसकैर्लक्षणा विवेचिता अस्ति।

मीमांसकेषु अन्यतमः आचार्यः मुकुलभट्टः अभूत्, यः लक्षणाया अन्तर्भावः मुख्यव्यापारे अभिधायामेव कृतवान् । अतः मुकुलभट्टः शब्दस्यैकमेवाभिधाव्यापारं स्वीकरोति। तस्य चाभिधाव्यापारस्य मुख्यो लाक्षणिकश्चेति भेदद्वयं वर्तत इत्यसौ शब्दव्यापारविचारे प्रतिपादयति। यथा तेनोक्तं **"शब्दस्य च मुख्येन लाक्षणिकेनाभिधा-व्यापारेणार्थावगतिहेतुत्वमिति मुख्यलाक्षणिकयोरभिधाव्यापारयोरत्र विवेकः क्रियते"**।[२०] एवं प्रकारेण मुख्यलाक्षणिकत्वेनाभिधाया भेदद्वयं प्रतिपाद्यासावुभयोर्भेदं निरूपयति। उक्तं च तेन-

**शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।**
**अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते॥**[२१]

तत्रैव मुकुलभट्टः कारिकां स्वामेव व्याख्याति यत्- "एवमयं मुख्यलाक्षणिकविषयोपवर्णद्वारेण शब्दस्याभिधाव्यापारो द्विविधः प्रतिपादितो निरन्तरार्थनिष्ठः सान्तरार्थनिष्ठश्च"। एवमुपर्युक्तानुसारं मुकुलभट्टस्य मतेन शब्दोच्चारणानन्तरमव्यवधानेन यस्यार्थस्य प्रतीतिर्भवति स मुख्यार्थः; तत्र च व्यापारोऽभिधाख्य इति। प्रकारान्तरेणासौ लक्षणां स्वीकरोति किन्तु नास्ति सा लक्षणा स्वतन्त्रा वृत्तिः। आदौ लक्षणायाः भेदद्वयं प्रतिपादितन्तेन शुद्धा उपचारमिश्रा च। आदिमा पुनः उपादानलक्षणलक्षणायां विभक्ता। अन्त्या च शुद्धोपचारमिश्रागौणोपचार-मिश्रयोर्विभाजिता। पुनस्शुद्धोपचारा गौणोपचारा लक्षणा क्रमशः सारोपासाध्यवसानयोर्विभक्ता विषयविशेषत्वात्। एवम्प्रकारेण मुकुलभट्टानुसारं लक्षणाया षट् प्रकारा भवन्ति -

१. उपादानलक्षणा, २. लक्षणलक्षणा, ३. सारोपा शुद्धोपचारा, ४. साध्यवसाना शुद्धोपचारा, ५. सारोपा गौणोपचारा, ६. साध्यवसाना गौणोपचारा। अत्रेदमवधार्यं यन्मुकुल भट्टस्येयं लक्षणाऽभिधावृत्तेरेवाङ्गभूता। नासौ लक्षणां स्वतन्त्रवृत्तिरूपेण स्वीकरोति।

## व्याकरणमते लक्षणायाः विवेचनम्

वैयाकरणैस्तावत् लक्षणा नैव स्वातन्त्र्येण स्वीकृता अपितु लक्षणा अभिधायाः एव एकोऽमुख्यः व्यापारः अस्ति। पतञ्जलिना कृतं महाभाष्यं व्याकरणस्य आकर इत्यभिकथ्यते। तस्मिन् महाभाष्येऽपि लक्षणायाः नामोल्लेखः नैव प्राप्यतेऽस्माभिः परन्तु लक्षणायाः स्वरूपन्तत्र विवेचितमस्ति। **"पुंयोदाख्यायाम्"**[२२] इत्यस्य सूत्रस्य भाष्ये भगवता लक्षणास्वरूपन्निगदितम्। व्याख्यानेऽमुष्मिन् 'तद्' इत्यस्मात् तद्भिन्नं बोधं समाधीयते यत् चतुर्भिर्प्रकारैस्तावत् भिन्नपदार्थात् भिन्नपदार्थस्य प्रतीतिर्जायते। चत्वारः प्रकाराः सन्ति-तात्स्थ्यम्, ताद्धर्म्यम्,

२०. अभिधावृत्तिमातृका, पृ. १

२१. अभिधावृत्तिमातृका, पृ. १, कारिका १

२२. पा. अष्टाध्यायी, ४.१.४८

तत्सामीप्यम्, तत्साहचर्यम्। यथोक्तमाकरे- **"किं पुनरतस्मिन् सः इत्येतत्भवति? चतुर्भिः प्रकारैरतस्मिन् सः इत्येतद्भवति- तात्स्थ्यात् तात्धर्म्यात् तत्सामीप्यात् तत्साहचर्यादिति ।"**[२३]

**तात्स्थ्यात्**-यत्र भेदे सत्यप्यभेदोपस्थापनस्य मूलमाधाराधेयभावः भवति, तत्तात्स्थ्यसम्बन्ध इति। यथा **"मञ्चाः हसन्ति" "गिरिर्दह्यते"** इत्यत्र "मञ्चाः" इत्यस्मात् पदात् मञ्चस्थपुरुषाणां बोधः भवति मञ्चस्थेषु च पुरुषेषु ताद्रूप्यमारोपितो भवति। अत्र मञ्चान्नितान्तभिन्नबालकान् मञ्च इत्युक्तम्। अस्मिन् भेदे अभेदस्य मूलन्तात्स्थ्यमेवास्ति।

**तात्धर्म्यात्** - यत्र भेदे अभेदस्य मूलं धर्म अर्थात् गुणो भवति, तत्तात्धर्म्यम्। यथा **"जटी ब्रह्मदत्तः।"** सिंहो माणवकः गौर्वाहीकश्चापि अस्यैवोदाहरणानीति प्रदीपकारः।

**तत्सामीप्यात्**-यत्र भेदयभेदस्थापस्य मूलं सामीप्यं भवति, तत्र तत्सामीप्यप्रकारः। यथा **"गङ्गायां घोषः"** अत्र तीरे गङ्गात्वारोपः। सामीप्यादेव गङ्गातीरं गङ्गेत्यभिधीयते।

**तत्साहचर्यात्**- तत्र भेदे अभेदस्य मूलं साहचर्यमस्ति, तत् तत्साहचर्यमुक्तमस्ति। यथा "कुन्तान् प्रवेशय", "यष्टीः प्रवेशय।" अत्र साहचर्यादेव कुन्तपदात् कुन्तधारिणः यष्टिपदाच्च यष्टिधराः गृह्यन्ते अस्माभिः। एतान्नेव पञ्चप्रकारान् परमलघुमञ्जूषायामाख्यान्नागेशः। **यथोक्तम्- "सा च लक्षणा तात्स्थ्यादिनिमित्तिका। तदाह- तात्स्थ्यात्तथैव ताद्धर्म्यात्तत्सामीप्यात्तथैव च। तत्साहचर्यात्तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः॥"**[२४]

तात्स्थ्तान्मञ्चा हसन्ति, ग्रामः पलायितः। ताद्धर्म्यात्सिंहो माणवकः, गौर्वाहीकः। तत्सामीप्यात् गङ्गायां घोषः। तत्साहचर्याद्यष्टीः प्रवेशय। तादर्थ्यादिन्द्रार्था स्थूणा इन्द्रः। समग्रमिदं विवेचनमग्रे लक्षणायाः बीजमभूत्। वस्तुतस्तु इदमेव स्वरूपं लक्षणायाः। इतः विचारमिमं गृहीत्वैव ध्वन्यालोकस्य बालप्रियायां टीकायां लक्षणायाः पञ्चप्रकारत्वं विहितमस्ति। यथा -

**अभिधेयेन सामीप्यात् सारूप्यात् समवायः।**
**वैपरीत्यात् क्रियायोगात् लक्षणा पञ्चधा मता॥**

एवमेव भर्तृहरिणाऽपि लक्षणायाः लक्षणन्न कृतं परन्तु उपचारशब्देनाभिहितं सहैव मुख्यगौणविषये पक्षद्वयमुपस्थापितम्। एकशब्दवादः अनेकशब्दवादश्च।

**एकशब्दवादः**- यत्रानेकार्थे सति एकस्यैव शब्दस्य प्रयोगः भवति। यथा एक एव गोशब्दः गोक्षितिगभस्त्याद्यनेकार्थवाचकः भवति। अत्र शङ्का उत्पद्यते यत् यद्यर्थभेदेऽप्येक एव गोशब्दस्तदा कथं ततो भिन्नार्थबोधः, पदभेदे हि भिन्नार्थबोधः दृष्टः। यतोहि कारणभेदे एव कार्यभेदः। प्रकरणादिरूपसहकारिकारणभेदाद् पदैक्येऽपि भिन्नार्थबोध उपपद्यत एव। पदरूपस्य निमित्तस्यैकस्येऽप्यर्थप्रकरणादिरूपस्य निमित्तान्तरस्य भेदात्, एकस्यापि तस्य गवादिपदस्य सर्वार्थवाचकत्वमनेकार्थविषयकबोधजनकत्वं वेति। यथोक्तं भर्तृहरिणा-

**एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः। निमित्तभेदादेकस्य सार्वार्थ्यं तस्य भिद्यते॥**[२५]
**यौगपद्यमतिक्रम्य पर्याये व्यवतिष्ठते। अर्थप्रकरणाभ्यां वा योगाच्छब्दान्तरेण वा॥**[२६]

---

२३. महाभाष्यम्, ४.१.४८
२४. प.ल.म., लक्षणानिरूपणम्
२५. वाक्यपदीयम्, वाक्यकाण्डः, कारिका २५०
२६. वाक्यपदीयम्, वाक्यकाण्डः, कारिका २५१

यथा–गौः पालयितव्या दुग्धायेति अत्र दुग्धरूपात् प्रयोजनात् प्रतीयमानात् धेनुरूपस्य मुख्यस्यैव गोपदार्थस्य प्रतीतिः।

भर्तृहरिः प्रसिद्ध्यप्रसिद्धिकारणात् गौणमुख्यविभाजनं करोत्ययमेव शब्दोपचारः। अर्थात् एकशब्दस्यैव अनेकार्थाः भवन्ति किन्तु शब्दस्य यस्मिन्नर्थे प्रसिद्धिरस्ति स एवार्थः मुख्यः अन्यश्च गौणः। यथा गौर्वाहीकः इत्यत्र गौशब्दस्यार्थः वाहीकोऽप्यस्ति किन्तु गौशब्दः प्रसिद्धः वाहीकश्चाप्रसिद्धः। अयमेव विषयः कारिकयोक्तम् –

**यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते।**
**तथा स एव गोशब्दो वाहीकेऽपि व्यवस्थितः।।**[२७]

अर्थात् यथा गोत्वजात्यभिधानपुरस्सरं येन शब्देन सास्नादिमान् पिण्डोऽभिधावृत्या बोध्यते तथा स एव गोशब्दस्तथैव वृत्या वाहीकार्थाभिधानेऽपि व्यवस्थितः। अभिधायाः प्रसिद्ध्यप्रसिद्धिनिमित्तकश्च गौणमुख्यविभागरूपश्शब्दोपचार इति। गौणमुख्यभावसन्दर्भे लिखितम्–

**सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः। प्रसिद्धिभेदाद् गौणत्वं मुख्यत्वं चोपवर्ण्यते।।**[२८]

**अनेकशब्दवादः** – यत्र अर्थभेदे सति शब्दभेदः भवति। अर्थात् एकैव शब्दः भिन्नभिन्नार्थेषु भिन्नभिन्न–शब्दरूपे गृहीतव्यः। यथा सास्नादिमतः गौरर्थस्य बोधकः गौश्शब्दः, गभस्त्यर्थकः गौश्शब्दः वस्तुतस्तु परस्परभिन्नोऽस्ति परन्तु अनयोर्द्वयोः ऐक्यप्रतीतौ सादृश्यनिबन्धना प्रत्यभिज्ञा कारणं वर्तत इति।

आचार्यभट्टोजिदीक्षितः हरदीक्षितश्च लक्षणां स्वीकृतवान्। भट्टोजिदीक्षितविरचितायां सिद्धान्तकौमद्याः टीकायां प्रौढमनोरमायामुक्ता वृतेर्द्विप्रकारता। शक्तिवृत्तिः लक्षणावृत्तिश्च। यथा– **"अर्थशब्दो वृत्तिविषयपरः वृत्तिस्तु शक्तिर्लक्षणा च गौणी तु लक्षणान्तर्भूता पृथग्वास्तु।"**[२९] एवमेव हरिदीक्षितः "द्रोणो व्रीहिरि"त्यत्र "सिंहो माणवक" इतिवल्लक्षणां स्वीकरन्तं लक्षणायाः स्वरूपं "शक्यतावच्छेदकारोपः" कथितवान्। यथा शब्दरत्नटीकायां सम्प्राप्तम् – **"द्रोणो व्रीहिरिति तु सिंहो माणवक इतिवल्लक्षणया साधु। लक्षणा च शक्यतावच्छेदकारोप एव। "**[३०]

अस्मिन् विषये महावैयाकरणैः नव्यैः नागेशैस्तावल्लक्षणायाः सम्यक् विवेचनं सम्प्राप्तं, तैः लक्षणायारुल्लेः लक्षणाखण्डनायैव कृतः, विस्तरेण नैयायिकादिमताननूद्य स्वमतन्तत्र स्थापितं यत् लक्षणा नास्ति स्वतन्त्रा वृत्तिरपितु लक्षणायारन्तर्भावः शक्तौ अभिधायां वैव भवति। नागेशः शक्तेर्द्विविधत्वमुक्तम्। प्रसिद्धाशक्ति–रप्रसिद्धाशक्तिश्च। प्रसिद्धाशक्तिं सामान्येन वयमभिधेत्यभिधीयामहे अप्रसिद्धाञ्च लक्षणा। लक्षणा अप्रसिद्धायामेवान्तर्भवति। यथोक्तन्नागेशेन– **"शक्तिर्द्विविधा प्रसिद्धाऽप्रसिद्धा च। आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्। सहृदयहृदयमात्रवेद्यात्वमप्रसिधात्वम्।"**[३१] तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौ चाप्रसिद्धेति।

अतएव सिद्धमिदं यत् वैयाकरणैः लक्षणायाः विवेचनं प्रकारान्तरेण कृतं किन्तु लक्षणा नैषा स्वतन्त्रवृत्तिः। अर्थात् लक्षणा तेषाम्मते अप्रसिद्धाऽभिधा अप्रसिद्धाशक्तिर्वेति कथितुं शक्यते।

२७. वाक्यपदीयम्, वाक्यकाण्डः, कारिका २५२
२८. वाक्यपदीयम्, वाक्यकाण्डः, कारिका २५३
२९. प्रौढमनोरमा, पृ.७६०
३०. प्रौढमनोरमायाः शब्दरत्नटीकायां, पृ. ७६५
३१. प.ल.म., लक्षणानिरूपणम्

## साहित्यमते लक्षणायास्स्वरूपम्

लक्षणामवलम्ब्य विशदतया साहित्यिकाचार्याः विवेचनमुपस्थापितवन्तः। यद्यपि लक्षणायास्सत्ताविषयिणि नैव मतैक्यम्। लक्षणाशब्दस्य आदिमः साहित्यिकप्रयोगः अग्निपुराणे सम्प्राप्तः किन्त्वयन्नास्ति शब्दशक्तिप्रसङ्गे अपित्वलङ्कारे। यथा-**स्वाभिध्यस्खलद्वृत्तिरमुख्यार्थस्य वाचकः। यया शब्दो निमित्तेन केनचित् सौपचारिकी। सा च लाक्षणिकी गौणी लक्षणा गुणयोगतः।**[३२] सा च लक्षणा सामीप्यादिपञ्चप्रकारादिनिमित्ता विद्यते। आलङ्कारिकेष्वाद्याचार्यः भामहः, येन लक्षणागर्भरूपकस्योदाहरणं व्याख्यायते।[३३] अनन्तरमुद्भट्टेनापि अनावृत्तशब्देषूक्तं यत् शब्दानां मुख्यव्यापारोऽभिधा अमुख्यश्च गुणवृत्तिरिति। यथोक्तमुद्भटेन-**शब्दानामभिधा मुख्यो व्यापारो गुणवृत्तिश्च।**[३४] एवमेवानन्दवर्धनोऽपि लक्षणां स्वीकृत्य लक्षणायाः खण्डनप्रसङ्गे एव लक्षणां **भक्तिशब्देन सम्बोध्यते। यथा-"भाक्तमाहुस्तमन्ये",**[३५] **"भक्त्या विभर्ति नैकत्वं रूपभेदादयं ध्वनिः"**[३६] अस्यैव लोचनटीकायामभिनवगुप्तपादाचार्येण भक्तेर्व्याख्यायन् भक्तेर्द्वैविध्यमप्युक्तम्। गौणी लक्षणा च। द्रष्टव्यमिदं लक्षणम् - **"भज्यते सेव्यते पदार्थेन प्रसिद्धतयोत्प्रेक्ष्यते इति भक्तिर्धर्मोऽभिधेयेन सामीप्यादिः। ततो आगतो भाक्तो लाक्षणिकोऽर्थः। ततो आगत इति गौणो लाक्षणिकश्च।"**[३७] मीमांसकानाम्मतं पूर्वमेव व्याख्यातमस्माभिः, मीमांसकेषु अन्यतमम्मतं मुकुलभट्टस्य तदपि पूर्वमेवाख्यमहन्तदपि द्रष्टव्यमिति। इदानीं मम्मटाभिमतायाः लक्षणायाः स्वरूपमुपस्थापनाय प्रयतते, यतोहि मम्मटेन लक्षणायाः चर्चा वैशद्येन सम्प्राप्ता। मम्मटस्तावत् शब्दानामर्थानाञ्च त्रैविध्यमुक्तवान्, ययोर्मध्ये काचित् शक्तिः वृत्तिर्वा तिष्ठति, साऽपि त्रिधैव, अभिधा, लक्षणा व्यञ्जना च।[३८] शक्तिष्वासु अन्तरैकाऽन्यतमा अमुख्या च लक्षणा। यस्य लक्षणं मम्मटेन कृतम- "मुख्यार्थबाधे तद्योगे रूढितोऽथप्रयोजनात्। अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया।।"[३९] अनया कारिकया लक्षणायास्स्वरूपं निगदितं मम्मटेन। विविच्यते अर्थात् लक्षणा नाम अन्यमर्थं लक्ष्यं करोति या सा, अर्थतः मुख्यार्थभिन्नमर्थं लक्ष्यतेऽनया, तस्याः लक्षणायास्त्रयः नियामकाः विद्यन्ते मम्मटमते। मुख्यार्थबाधः, मुख्यार्थयोगः, रूढिः प्रयोजनं वा। प्रश्नश्चेद् कदा प्रयुज्यते लक्षणा तर्हि मुख्यार्थस्य बाधे मुख्यार्थयोगे च सत्याभ्यां सहैव रूढिः प्रयोजनो वा स्यात् तदा प्रयुज्यते। कीदृशी क्रिया चेत्तर्हि आरोपिता क्रिया इत्युक्ते कल्पितः व्यापारः। शब्दार्थयोर्मध्ये वाच्यवाचकसम्बन्धः स्वाभाविकः तदतिरिक्तोऽन्यो कल्पितः व्यापारः। अतः लक्षणा नास्ति स्वाभाविकः व्यापार अपितु कल्पितः। उदाह्रियते यथा **"कर्मणि कुशलः", "गङ्गायां घोषः"** इत्यत्र क्रमशः दर्भग्रहणाद्ययोगात् घोषाद्याधारत्वासम्भवाच्च मुख्यार्थबाधः, विवेचकत्वसामीप्यादिसम्बन्धेन रूढितः प्रयोजनाच्च मुख्येनामुख्यार्थो लक्ष्यते यत् स आरोपितशब्दव्यापारः लक्षणा।

---

३२. अग्निपुराणम्, ३४५, ९-१०

३३. उपमानेन यत्तत्वमुपमेयस्य दृश्यते। गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः।। काव्यालङ्कारः, २.२१

३४. काव्यालङ्कारसूत्रवृत्तिः, पृ. २३५

३५. ध्वन्यालोकः, कारिका - १


३६. ध्वन्यालोकः, कारिका - १४

३७. प्रथमः उद्योतः, लोचनटीकायां, पृ. ४९

३८. स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्तथा। का. प्र. २.५

३९. का. प्र. २. १२

लक्षणाया अस्याः मम्मटः षट्भेदान्नकथयत्। आदौ शुद्धा गौणी भेदाद्विधाऽनन्तरं शुद्धायाः द्वैविध्यं स्वीकृत्य अन्ये द्वे लक्षणे सारोपासाध्यवसानिकाभेदात्। यथा –**"स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्। उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा॥"**[४०] यथा – कुन्ताः प्रविशन्ति गङ्गायां घोषश्च। एवमेव **"सारोपातु यत्रोक्तौ विषयी विषयस्तथा"**,[४१] **"विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका"**,[४२] **"भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्तथा। गौणौ शुद्धौ च विज्ञेयौ"**[४३] अतः लक्षणा षड्विधा प्रसिद्धा **"लक्षणा तेन षड्विधा"** इति वचनात्। चित्रमाध्यमेन लक्षणायाः विभाजनमुच्यते –




मम्मटमतेन सह विश्वनाथाचार्यस्यापि सहमतिर्दरीदृश्यते किन्तु शक्तिविषये कश्चिद्भेदोऽप्यस्ति। यथा मम्मटः स्वीक्रियते यत् लक्षणा कल्पिता शक्तिर्व्यापारो वा वर्तते, अर्थात् शब्दार्थानन्तरा स्वाभाविकवाच्यवाचकादिसम्बन्धः भवति, लक्षणेयं स्वाभाविकेतरस्सम्बन्धः अर्थात् कल्पितः। गङ्गायां घोषः इत्यत्र गङ्गाशब्दस्य अर्थः जलप्रवाहविशेषः अर्थादनयोर्मध्ये वाच्यवाचकस्वाभाविकसम्बन्धः, किन्तु जलप्रवाहविशेषे घोषाधारत्वासम्भवः अतः जलप्रवाहविशेषसामीप्यसम्बन्धावच्छिन्नतटः लक्ष्यते यया सा लक्षणा, सा च कल्पिता, एवमेव विश्वनाथमतेऽपि लक्षणा कल्पिता शक्तिरस्ति न च स्वाभाविकी।

**मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते।**
**रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥"**[४४]

४०. का. प्र. २. सू. १३, कारिका १०
४१. का. प्र. २. सूत्र १४, कारिका ११
४२. का. प्र. २. सूत्र १५, कारिका ११
४३. का. प्र. २. सूत्र १६
४४. साहित्यदर्पणः, २.४

यद्यपि विश्वनाथेन लक्षणायाः भेदाः मम्मटादधिकास्स्वीकृताः। विश्वनाथस्तावदशीतिभेदानङ्गीकरोति। एवम्प्रकारेण लक्षणायाः विषये विभिन्नशास्त्रेषु न्यायमीमांसाव्याकरणसाहित्यादिषु विवेचनमस्माभिर्प्राप्यते। विषयोऽयं महत्त्वपूर्णोऽस्येतस्मात् कारणात् समेषु शास्त्रेषु वर्णनमस्य विस्तरेणाचार्यैर्कृतम्। अस्य नास्ति केवलमुपयोगिता शास्त्रेष्वपितु लोकोपयोग्ययं विषयः। जनाः शास्त्रमनधीत्याऽपि शब्दानां प्रयोगः कुर्वन्ति, शब्दानाञ्च शक्तीः अपि प्रयुञ्जन्ति यथा– कोऽप्यपरं स्वसम्बन्धिनमुच्यते यत् मम गृहं मार्गे एव अस्ति, आगच्छतु अन्वेषणे नैव काचित् समस्या भविष्यत्यत्र मार्गे गृहं भवितुन्नैवार्हत्यतः मुख्यार्थं त्यक्त्वा मार्गसामीप्यमवगच्छन्ति जनाः। अर्थात् विषयस्यास्योपगिता लोकाय अपि तादृशी एव यादृशी शास्त्रेभ्यः। शास्त्रमुकारकमिति सत्यमेव।

## सन्दर्भग्रन्थसूची


१. अग्निपुराणम्, (व्या० आचार्यशिवप्रसादद्विवेदी), चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, २००४.

२. आनन्दवर्धनः, ध्वन्यालोकः, जयदासहरिदासगुप्तः चौखम्बासीरीज ऑफिस इति, बनारसः, १९०४

३. अभिनवगुप्तः, लोचनटीका, जयदासहरिदासगुप्तः चौखम्बा सीरीज ऑफिस इति, बनारसः, १९०४

४. कुमारिलभट्टः, श्लोकवार्तिकम्, (पार्थसारथिमिश्रविरचितान्यायरत्नाख्यया व्याख्यया समन्वितम्), चौखम्बाबुकडिपो इति, १८९८

५. कुमारिलभट्टः, तन्त्रवार्तिकम्, श्रीसत्गुरुप्रकाशनम्, शक्तिनगरम्, दिल्ली, १९८३

६. कौण्डभट्टः, वैयाकरणभूषणसारः, (सुबोधिनीव्याख्योपेतः), (व्या० चन्द्रप्रकाशद्विवेदी), तृतीयसंस्करणम्, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, २००१

७. गौतमः, न्यायसूत्रम्, (अनु० प्रो. राजारामः), डी. ए. वी. कालेज, लाहौरः, १९२१

८. गङ्गेशोपाध्यायः, तत्त्वचिन्तामणि, (जागदीशीटीकयोपेता), शब्दखण्डः, एसियाटिक सोसायटी ऑफ बङ्गाल इति, कलकत्ता, १८८८–१९०१

९. जगदीशतर्कालङ्कारः, शब्दशक्तिप्रकाशिका, (कृष्णकान्तीप्रबोधिनीव्याख्याद्वयोपेता), चौखम्बा संस्कृत सीरीज आफिस इति, वाराणसी, १९७३

१०. जैमिनिः, मीमांसासूत्रम्, (अनु. मोहनलालसन्दलः), मोतीलालबनारसीदासः, दिल्ली, १९९३

११. नागेशः, परमलघुमञ्जूषा, (व्या. डॉ. जयशङ्करलालत्रिपाठी), कृष्णादास–अकादमी, वाराणसी, १९८५

१२. पाणिनिः, अष्टाध्यायी, (अनु. श्रीशाचन्द्रवसुः), सिन्धुचरणबोसः, पाणिनी आफिस, टोरन्टो विवि. पुस्तकालयः, १८९७

१३. पतञ्जलिः, महाभाष्यम्, (व्या. चारुदेवशास्त्री), मोतीलालबनारसीदासः, दिल्ली, १९६८

१४. भर्तृहरिः, वाक्यपदीयम्, पुण्यराजकृतया टीकया, अम्बाकर्त्रीव्याख्यया चोपेत, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९८०

१५. भट्टोजिदीक्षितः, सिद्धान्तकौमुदी, लक्ष्मीव्याख्योपेता, मोतीलालबनारसीदासः, दिल्ली, १९६६

१६. भट्टोजिदीक्षितः, सिद्धान्तकौमुदी, (व्या. डॉ. जयशङ्करलालत्रिपाठी), प्रौढमनोरमाटीकयोपेता, भावप्रकाशिनी भावबोधिनी च हिन्दीव्याख्योपेता, कृष्णादास–अकादमी, वाराणसी, १९८६

१७. भामहः, काव्यालङ्कारः, (व्या. देवेन्द्रनाथशर्मा), बिहारराष्ट्रभाषापरिषद्, पटना, १९८५

१८. मम्मटः, अभिधामातृवृत्तिका, सुबोधिनी सङ्गमनी च हिन्दीसंस्कृतव्याख्योपेता, कृष्णादास-अकादमी, वाराणसी, २००८

१९. वामनः, काव्यालङ्कारसूत्रवृत्तिः, श्रीजीवानन्दविद्यासागरभट्टाचार्येण प्रकाशिता, गुरुकुलकाङ्गडीसङ्ग्रहः, १८९२

२०. विश्वनाथपञ्चाननभट्टाचार्यः, कारिकावली, न्यायसिद्धान्तमुक्तावलिटीकयोपेता, चन्द्रिकाहिन्दीव्याख्योपेता, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, दिल्ली, २०१५

२१. विश्वनाथपञ्चाननभट्टाचार्यः, न्यायसिद्धान्तमुक्तावली, चन्द्रिकाहिन्दीव्याख्योपेता, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विश्वविद्यालयः, दिल्ली, २०१५

२२. शबरस्वामी, शाबरभाष्यम्, (व्या. युधिष्ठिरमीमांसकः), आर्षमतविमर्शिन्या हिन्दीव्याख्यया सहितम्, युधिष्ठिरमीमांसकः, बहालगढ, सोनीपत-हरियाणा, १९७७

२३. भट्टोजिदीक्षितः, सिद्धान्तकौमुदी, (व्या. डॉ. जयशङ्करलालत्रिपाठी), प्रौढमनोरमाटीकयोपेता, हरिदीक्षितविरचिता शब्दरत्नटीकासमन्विता, भावप्रकाशिनी भावबोधिनी च हिन्दीव्याख्योपेता, कृष्णादास-अकादमी, वाराणसी, १९८६

**-शोधच्छात्रः,**
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,**
**नई दिल्ली, ११००१८**

# संस्कृत वाङ्मय में नीतिशास्त्र और मनोविज्ञान

-डॉ. भेषराज शर्मा

परिचय-

विश्व की प्रत्येक घटना का वर्णन साहित्य में प्राप्त होता है। साहित्य समाज का दर्पण है। भूतकाल से हमें कुछ शिक्षा प्राप्त करनी है तो उसका सर्वश्रेष्ठ साधन साहित्य ही है। साहित्य में धर्म, अर्थ, काम तथा मोक्ष-इन चार पुरुषार्थ और इनको प्राप्त करने का निर्देश प्राप्त होता है। विडम्बना तो यह कि इस जरामरण विशेषता से युक्त संसार में मनुष्य अपने में ही सिमटकर रह गया है। एकल परिवार, एकाकीपन और आत्ममुग्धता के कारण आजकल का मानव किसी की नहीं सुनता है, किसी की नहीं मानता है। जब वह किसी की सुनेगा ही नहीं, किसी की मानेगा ही नहीं तो वह अपने अतीत से किस प्रकार शिक्षा ले पायेगा। हर कोई अपने को श्रेष्ठ मानता है या आत्ममुग्ध है, उसको नैतिक शिक्षा की वाञ्छा ही नहीं रही इसलिए ही भर्तृहरि लिखते हैं -

**बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।**
**अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥**[1]

**जीर्णमङ्गे सुभाषितम्** का तात्पर्य है कि अतीत का अनुभव शनैः शनैः लुप्त हो जायेगा। विज्ञजनों ने इसी अनुभव को सत्साहित्य में नीतिशास्त्रों के माध्यम से संरक्षित रखा है। भगवान् श्री कृष्ण ने भी श्रीमद्भगवद् गीता में कहा है -

**नीतिरस्मि जिगीषताम्।**[2]

अर्थात् विजय की इच्छा रखने वालों के लिए में नीति स्वरूप हूँ। भवसागर की विविध जटिलताओं पर विजय प्राप्त करना ही जीवनलक्ष्य की प्राप्ति है। नीतिशास्त्र का उद्देश्य है- **कर्माकर्म विवेक।**

सांसारिक जीवन में व्यक्ति, परिवार जाति, वर्ग, राष्ट्र आदि भिन्न भिन्न घटकों के प्रति हमारे पृथक-पृथक कर्त्तव्य होते है। इन सभी घटकों से सद्व्यवहार हेतु जिस शास्त्र में कतिपय विशेष नियम होते हैं, उसे नीतिशास्त्र कहते हैं।

नीतिशास्त्र मर्मज्ञ महान् विद्वान चाणक्य का पहला वाक्य है-**सुखस्य मूलं धर्मः।** अतः हम कह सकते हैं कि सर्वोत्तम नीति धर्माचरण ही है। धर्माचरण का उपदेश वैदिक साहित्य से ही प्राप्त होना प्रारम्भ हो जाता है -

- **सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।**[3]

अर्थात् तुम मिलकर चलो, एक साथ होकर स्तोत्र-गान करो, तुम्हारे मनोभाव एकरूप हों।

- **समानी व आकूतिः समाना हृदयानि वः।**[4]

अर्थात् तुम्हारा अध्यवसाय (निश्चय) एक हो, तुम्हारा हृदय भी एक हो।

१. नीतिशतक
२. श्रीमद्भगवद् गीता १०.३८
३. ऋग्वेद १०.१९१.०२
४. ऋग्वेद १०.१९१.०४